# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - शास्त्री-२, सेमेस्टर-३** | **प्रश्नपत्रम् - ५** | **गुणाः - ७०** |
| **विषयः - धर्मशास्त्रम्** | **कोड - CC-2.3.5** | **समयः - ०३-०६** |
| **दिनाङ्कः - २९.११.२०१६** | **ग्रन्थः - याज्ञवल्क्यस्मृतिः आचाराध्यायः** | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ द्वयोः ससन्दर्भं भावार्थं लिखन्तु । ०८**

(१) *मिथिलास्थः स योगीन्द्रः क्षणं ध्यात्वाऽब्रवीन्मुनीन् ।*
*यस्मिन्देशे मृगः कृष्णस्तस्मिन्धर्मान्निबोधत ॥*

(२) *इज्याचारदसाहिंसादानस्वाध्यायकर्मणाम् ।*
*अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् ॥*

(३) *एकदेशमुपाध्याय ऋद्विग्यज्ञकृदुच्यते ।*
*एतेमान्या यथापूर्वमेभ्यो माता गरीयसी ॥*

**प्रश्नः २ एकस्योत्तरं सविस्तरं लिखन्तु । ०८**

(१) *धर्ममूलं च उपनयनकालम् ।*

(२) *सावित्राजपप्रकारः च गुरुलक्षणम् ।*

**प्रश्नः ३ द्वयोः टिप्पणीं लिखन्तु । ०४**

*(१) वेदग्रहणाध्ययनफलम् ।* *(२) वरनियमम् ।*
*(३) ब्राह्मविवाहः ।*

**प्रश्नः ४ पञ्चानाम् लघूत्तरं लिखन्तु । ०५**

(१) *प्रथमसंस्कारस्य अंतिमसंस्कारस्य च नाम किम् ?*

(२) *ग्रन्थकारस्य नाम किम् ?*

(३) *अभिवादनस्य फलं किम् ?*

(४) *धर्मस्य कति स्थानानि ?*

(५) *शौचाचारान् कः शिक्षयति ?*

(६) *द्विजशब्दस्यार्थः कः ?*

(७) *'स्मृति' शब्दस्य कोऽर्थः ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ५ कयोरपि द्वयोः श्लोकयोः ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या । ०८**

(१) *अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम् ।*
*स्वाध्यायं सततं कुर्यान्न पचेदन्नमात्मने ॥*

(२) *अध्वानीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ।*
*मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥*

(३) *ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।*
*धर्मार्थकामान् स्वेकाले यथाशक्ति न दापयेत् ॥*

**प्रश्नः ६ एकस्योत्तरं लिखन्तु ।** ०८

(१) *सर्वेषां धर्मसाधनं च संवत्सरकर्तव्यानि लिखत ।*

(२) *स्नातकधर्मान् प्रतिपादयत ।*

**प्रश्नः ७ एकां टिप्पणीं लिखन्तु ।** ०२

*(१) श्रोत्रियकर्म ।* *(२) स्वाध्यायः ।*

**प्रश्नः ८ द्वयोः लघूत्तरं लिखन्तु ।** ०२

*(१) सजातयः कथं जायन्ते ?*

*(२) जपयज्ञप्रसिद्धर्थं किं कर्तव्यम् ?*

*(३) के महामखाः ।*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ९ द्वयोः सप्रसङ्गं भावार्थं लिखन्तु ।** ०८

(१) *तपस्तप्त्वाऽसृजद्ब्रह्मा ब्राह्मणान् वेदगुप्तये ।*
*तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ॥*

(२) *न विद्यया केवलया तपसा वापि पात्रता ।*
*यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥*

(३) *श्रान्त संवाहनं रोगि परिचर्या सुगंधनम् ।*
*पादशौचं द्विजोच्छिष्ट मार्जनं गोप्रदानवत् ॥*

**प्रश्नः १० एकस्योत्तरं लिखन्तु ।** ०८

(१) *के श्राद्दकालाः प्रकीर्तिताः ?*

(२) *पितृश्राद्धे का प्रार्थना प्रस्तोतव्या ?*

**प्रश्नः ११ द्वयोः टिप्पणीं लिखन्तु ।** ०४

*(१) एकोद्दिष्ट श्राद्धकालः ।*

*(२) श्राद्धे कर्तव्यकर्म ।*

*(३) विनायकोपस्थानम् ।*

**प्रश्नः १२ पञ्चानां लघूत्तरं लिखन्तु ।** ०५

*(१) कति ग्रहाः के च ते ?*

*(२) ग्रहयज्ञस्य किं फलम् ?*

*(३) पुरोहित लक्षणं किम् ?*

*(४) राज्ञा रणार्जितद्रव्यैः किं कर्तव्यम् ?*

*(५) प्रजाभ्यः राजा कीदृशः भवति ?*

*(६) प्रजापीडनसंतापात् किं भवति ?*

*(७) राज्ञा दण्डप्रयोगः कदा कर्तव्यः ?*

=०=